श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.8- प्रथम सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्

nārāyaṇaṃ(n) namaskṛtya, naraṃ(*ñ)*caiva narottamam
devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet

नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्

nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam
praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param

श्रीमद्भागवतमहापुराणम्
एकादशः स्कंधः
अथाष्टमोऽध्यायः

Śrīmad bhāgawatamahāpurāṇam
Ekādaśḥ skaṃdhaḥ
Athāśtamo"dhāyaḥ

## ब्राह्मण उवाच

सुखमैन्द्रियकं(म्) राजन्, स्वर्गे नरक एव च ।
देहिनां(म्) यद् यथा दुःखं(न्), तस्मान्नेच्छेत तद् बुधः ॥ 1 ॥

brāhmaṇa uvāca

sukhamaindriyakaṃ(m) rājan, svarge naraka eva ca .
dehināṃ(m) yadyathā duḥkhaṃ(n), tasmānneccheta tadbudhaḥ .. 1..

sukhamain+ driyakaṃ(m), tasmān +neccheta

ग्रासं(म्) सुमृष्टं(म्) विरसं(म्), महान्तं(म्) स्तोकमेव वा ।
यदृच्छयैवापतितं(ङ्), ग्रसेदाजगरोऽक्रियः ॥ 2 ॥

grāsaṃ(m) sumṛṣṭaṃ(m) virasaṃ(m), mahāntaṃ(m) stokameva vā .
yadṛcchayaivāpatitaṃ(ṅ), grasedājagaro'kriyaḥ .. 2..

yadṛc+ chayaivā + patitaṃ(ṅ), grasedā + jagaro'+ kriyaḥ

शयीताहानि भूरीणि, निराहारोऽनुपक्रमः ।
यदि नोपनयेद् ग्रासो , महाहिरिव दिष्टभुक् ॥ 3।।

śayītāhāni bhūrīṇi, nirāhāro'nupakramaḥ .
yadi nopanamedgrāso, mahāhiriva diṣṭabhuk .. 3..

nirāhāro'+ nupakramaḥ, mahā+ hiriva

ओजः(स्)सहोबलयुतं(म्), बिभ्रद् देहमकर्मकम् ।
शयानो वीतनिद्रश्च, नेहेतेन्द्रियवानपि ॥ 4 ॥

ojaḥ(s) sahobalayutaṃ(m), bibhrad dehamakarmakam .
śayāno vītanidraśca, nehetendriyavānapi .. 4..

deha+ makarmakam, nehetendri+ yavānapi

मुनिः(फ्) प्रसन्नगम्भीरो, दुर्विगाह्यो दुरत्ययः ।
अनन्तपारो ह्यक्षोभ्यः(स्), स्तिमितोद इवार्णवः ॥ 5 ॥

muniḥ(ph) prasannagambhīro, durvigāhyo duratyayaḥ .
anantapāro hyakṣobhyaḥ(s), stimitoda ivārṇavaḥ .. 5..

dur+ vigāhyo, stimi+ toda

समृद्धकामो हीनो वा , नारायणपरो मुनिः ।
नोत्सर्पेत न शुष्येत, सरिद्भिरिव सागरः ॥ 6 ॥

**samṛddhakāmo hīno vā, nārāyaṇaparo muniḥ .**

**notsarpeta na śuṣyeta, saridbhiriva sāgaraḥ .. 6..**

samṛd+ dhakāmo, sarid+ bhiriva

**दृष्ट्वा स्त्रियं(न्) देवमायां(न्), तद्भावैरजितेन्द्रियः ।**

**प्रलोभितः(फ्) पतत्यन्धे, तमस्यग्नौ पतं(ङ्)गवत् ॥ 7 ॥**

**dṛṣṭvā striyaṃ(n) devamāyāṃ(n), tadbhāvairajitendriyaḥ .**

**pralobhitaḥ(ph) patatyandhe, tamasyagnau pataṃ(ṅ)gavat .. 7..**

tad+ bhāvai+rajitendriyaḥ

**योषिद्धिरण्याभरणाम्बरादि-**

**द्रव्येषु मायारचितेषु मूढः ।**

**प्रलोभितात्मा ह्युपभोगबुद्ध्या,**

**पतं(ङ्)गवन्नश्यति नष्टदृष्टिः ॥ 8 ॥**

**yoṣiddhiraṇyābharaṇāmbarādi-**

**dravyeṣu māyāraciteṣu mūḍhaḥ .**

**pralobhitātmā hyupabhogabuddhyā**

**pataṃ(ṅ)gavannaśyati naṣṭadṛṣṭiḥ .. 8..**

yoṣid+ dhiraṇyā+ bharaṇām+ barādi, māyā+ raciteṣu,

hyupa+ bhoga+ buddhyā, pataṃ(ṅ)+ gavan+ naśyati

**स्तोकं(म्) स्तोकं(ङ्) ग्रसेद् ग्रासं(न्), देहो वर्तेत यावता ।**

**गृहानहिं(व्)सन्नातिष्ठेद् , वृत्तिं(म्) माधुकरीं(म्) मुनिः ॥ 9 ॥**

**stokaṃ(m) stokaṃ(ṅ) grasedgrāsaṃ(n), deho varteta yāvatā .**

**gṛhānahiṃ(v)sannātiṣṭhed, vṛttiṃ(m) mādhukarīṃ(m) muniḥ .. 9..**

gṛhā+ nahiṃ(v)san+ nātiṣṭhed

**अणुभ्यश्च महद्भ्यश्च, शास्त्रेभ्यः(ख्) कुशलो नरः ।**

**सर्वतः(स्) सारमाददद्यात् , पुष्पेभ्य इव षट्पदः ॥ 10 ॥**

aṇubhyaśca mahadbhyaśca, śāstrebhyaḥ(kh) kuśalo naraḥ .

sarvataḥ(s) sāramādadyāt, puṣpebhya iva ṣaṭpadaḥ .. 10..

aṇubhya+ śca mahad+ bhyaśca, sāramā+ dadyāt

सायन्तनं(म्) श्वस्तनं(म्) वा, न सं(ङ्)गृह्णीत भिक्षितम् ।

पाणिपात्रोदरामत्रो, मक्षिकेव न सङ्ग्रही ॥ 11 ॥

sāyantanaṃ(m) śvastanaṃ(m) vā, na saṃ(ṅ)gṛhṇīta bhikṣitam .

pāṇipātrodarāmatro, makṣikeva na saṅgrahī .. 11..

śvas+ tanaṃ(m), pāṇi+ pātro+ darāmatro

सायन्तनं(म्) श्वस्तनं(म्) वा , न सं(ङ्)गृह्णीत भिक्षुकः ।

मक्षिका इव सं(ङ्)गृह्णन् , सह तेन विनश्यति ॥ 12 ॥

sāyantanaṃ(m) śvastanaṃ(m) vā, na saṃ(ṅ)gṛhṇīta bhikṣukaḥ .

makṣikā iva saṃ(ṅ)gṛhṇan, saha tena vinaśyati .. 12..

saṃ(ṅ)gṛh+ ṇīta

पदापि युवतीं(म्) भिक्षुर्न, स्पृशेद् दारवीमपि ।

स्पृशन् करीव बध्येत, करिण्या अं(ङ्)गसं(ङ्)गतः ॥ 13 ॥

padāpi yuvatīṃ(m) bhikṣurna, spṛśed dāravīmapi .

spṛśan karīva badhyeta, kariṇyā aṃ(ṅ)gasaṃ(ṅ)gataḥ .. 13..

dā+ ravī+ mapi, aṃ(ṅ)ga+ saṃ(ṅ)gataḥ

नाधिगच्छेत् स्त्रियं(म्) प्राज्ञः(ख्), कर्हिचिन्मृत्युमात्मनः ।

बलाधिकैः(स्) स हन्येत, गजैरन्यैर्गजो यथा ॥ 14 ॥

Nādhigacchet striyaṃ(m) prajñaḥ(kh), karhicinmṛtyumātmanaḥ .

balādhikaiḥ(s) sa hanyeta, gajairanyairgajo yathā .. 14..

karhicin+ mṛtyu+ mātmanaḥ,

gajai+ ranyair+ gajo

न देयं(न्) नोपभोग्यं(ञ्) च, लुब्धैर्यद् दुःखसं(ञ्)चितम् ।

भुङ्क्ते तदपि तच्चान्यो, मधुहेवार्थविन्मधु ॥ 15 ॥

na deyaṃ(n) nopabhogyaṃ(ñ) ca, lubdhairyad duḥkhasaṃ(ñ)citam .

bhuṅkte tadapi taccānyo, madhuhevārthavinmadhu .. 15..

no+ pabhogyaṃ(ñ), madhu+ hevārtha+ vinmadhu

सुदुःखोपार्जितैर्वित्तै- राशासानां(ङ्) गृहाशिषः ।

मधुहेवाग्रतो भुङ्क्ते, यतिर्वै गृहमेधिनाम् ॥ 16 ॥

suduḥkhopārjitairvittai- rāśāsānāṃ(ṇ) gṛhāśiṣaḥ .

madhuhevāgrato bhuṅkte, yatirvai gṛhamedhinām .. 16..

suduḥkho+ pār+ jitair+ vittai, madhuhevā+ grato

ग्राम्यगीतं(न्) न शृणुयाद्, यतिर्वनचरः(ख्) क्वचित् ।

शिक्षेत हरिणाद् बद्धान्- मृगयोर्गीतमोहितात् ॥ 17 ॥

grāmyagītaṃ(n) na śṛṇuyād, yatirvanacaraḥ(kh) kvacit .

śikṣeta hariṇād baddhān- mṛgayorgītamohitāt .. 17..

yatir+ vanacaraḥ(kh), mṛgayor+ gīta+ mohitāt

नृत्यवादित्रगीतानि, जुषन् ग्राम्याणि योषिताम् ।

आसां(ङ्) क्रीडनको वश्य, ऋष्यशृङ्गो मृगीसुतः ॥ 18॥

nṛtyavāditragītāni, juṣan grāmyāṇi yoṣitām .

āsāṃ(ṇ) krīḍanako vaśya, ṛṣyaśṛṅgo mṛgīsutaḥ .. 18..

nṛtya+ vāditra+ gītāni, ṛṣya+ śṛṅgo

जिह्वयातिप्रमाथिन्या, जनो रसविमोहितः ।

मृत्युमृच्छत्यसद्बुद्धिर् - मीनस्तु बडिशैर्यथा ॥ 19॥

Jihvayātipramāthinyā, jano rasavimohitaḥ .

mṛtyumṛcchatyasadbuddhir- mīnastu baḍiśairyathā .. 19..

Jihvayā+ tipramā+ thinyā, mṛtyu+ mṛcchatya+ sadbuddhir,

baḍiśair+ yathā

इन्द्रियाणि जयन्त्याशु, निराहारा मनीषिणः ।

वर्जयित्वा तु रसनं(न्), तन्निरन्नस्य वर्धते ॥ 20 ॥

indriyāṇi jayantyāśu, nirāhārā manīṣiṇaḥ .
varjayitvā tu rasanaṃ(n), tannirannasya vardhate .. 20..

jayan+ tyāśu, tanni+ rannasya

तावज्जितेन्द्रियो न स्याद्, विजितान्येन्द्रियः(फ्) पुमान् ।
न जयेद् रसनं(म्) यावज्-जितं(म्) सर्वं(ञ्) जिते रसे ॥21 ॥

tāvajjitendriyo na syād, vijitānyendriyaḥ(ph) pumān .
na jayed rasanaṃ(m) yāvaj- jitaṃ(m) sarvaṃ(ñ) jite rase .. 21..

tāvaj+ jitendriyo, vijitān+ yendriyaḥ(ph)

पिं(ङ्)गला नाम वेश्याऽऽसीद्, विदेहनगरे पुरा ।
तस्या मे शिक्षितं(ङ्) किं(ञ्)चिन्- निबोध नृपनन्दन ॥ 22 ॥

Piṃ(ṅ)galā nāma veśyā''sīd, videhanagare purā .
tasyā me śikṣitaṃ(ṅ) kiṃ(ñ)cin-nibodha nṛpanandana .. 22..

सा स्वैरिण्येकदा कान्तं(म्), सं(ङ्)केत उपनेष्यती ।
अभूत् काले बहिर्द्वारि , बिभ्रती रूपमुत्तमम् ॥23 ॥

sā svairiṇyekadā kāntaṃ(m), saṃ(ṅ)keta upaneṣyatī .
abhūt kāle bahirdvāri, bibhratī rūpamuttamam .. 23..

svai+ riṇye+ kadā, rū+ pamut+ tamam

मार्ग आगच्छतो वीक्ष्य, पुरुषान् पुरुषर्षभ ।
तां्छुल्कदान् वित्तवतः(ख्), कान्तान् मेनेऽर्थकामुका ॥ 24 ॥

mārga āgacchato vīkṣya, puruṣān puruṣarṣabha .
tāñchulkadān vittavataḥ(kh), kāntān mene'rthakāmukā .. 24..

puruṣar+ ṣabha, tāñ+ chulka+ dān,

vitta+ vataḥ(kh), mene'rtha+ kāmukā

आगतेष्वपयातेषु, सा सं(ङ्)केतोपजीविनी ।
अप्यन्यो वित्तवान् कोऽपि, मामुपैष्यति भूरिदः ॥ 25॥

āgateṣvapayāteṣu, sā saṃ(ṅ)ketopajīvinī .

apyanyo vittavān ko'pi, māmupaiṣyati bhūridaḥ .. 25..

āgateṣva+ payāteṣu, saṃ(ṅ)ke+ topa+ jīvinī, , māmu+ paiṣyati

एवं(न्) दुराशया ध्वस्त- निद्रा द्वार्यवलम्बती ।

निर्गच्छन्ती प्रविशती , निशीथं(म्) समपद्यत ॥ 26 ॥

evaṃ(n) durāśayā dhvasta- nidrā dvāryavalambatī .

nirgacchantī praviśatī, niśīthaṃ(m) samapadyata .. 26..

dvār+ yava+ lambatī, nir+ gacchantī

तस्या वित्ताशया शुष्यद्- वक्त्राया दीनचेतसः ।

निर्वेदः(फ्) परमो जज्ञे, चिन्ताहेतुः(स्) सुखावहः ॥ 27 ॥

tasyā vittāśayā śuṣyad- vaktrāyā dīnacetasaḥ .

nirvedaḥ(ph) paramo jajñe, cintāhetuḥ(s) sukhāvahaḥ .. 27..

vit+ tāśayā

तस्या निर्विण्णचित्ताया , गीतं(म्) शृणु यथा मम ।

निर्वेद आशापाशानां(म्), पुरुषस्य यथा ह्यसिः ॥ 28॥

tasyā nirviṇṇacittāyā, gītaṃ(m) śṛṇu yathā mama .

nirveda āśāpāśānāṃ(m), puruṣasya yathā hyasiḥ .. 28..

nirviṇṇa+ cittāyā

न ह्यं(ङ्)गाज्जातनिर्वेदो , देहबन्धं(ञ्) जिहासति ।

यथा विज्ञानरहितो, मनुजो ममतां(न्) नृप ॥ 29॥

na hyaṃ(ṅ)gājātanirvedo, dehabandhaṃ(ñ) jihāsati .

yathā vijñānarahito, manujo mamatāṃ(n) nṛpa .. 29..

hyaṃ(ṅ)gā+ jāta+ nirvedo

पिं(ङ्)गलोवाच

अहो मे मोहविततिं(म्), पश्यताविजितात्मनः ।

या कान्तादसतः(ख्) कामं(ङ्), कामये येन बालिशा ॥30 ॥

**Piṃ(ṅ)galovāca**

**aho me mohavitatiṃ(m), paśyatāvijitātmanaḥ .**
**yā kāntādasataḥ(kh) kāmaṃ(ṅ), kāmaye yena bāliśā .. 30..**

paśyatā+ vijitātmanaḥ,
kāntā+ dasataḥ(kh)

**सन्तं(म्) समीपे रमणं(म्) रतिप्रदं(म्),**
**वित्तप्रदं(न्) नित्यमिमं(म्) विहाय ।**
**अकामदं(न्) दुःखभयाधिशोक-**
**मोहप्रदं(न्) तुच्छमहं(म्) भजेऽज्ञा ॥ 31 ॥**

**santaṃ(m) samīpe ramaṇaṃ(m) ratipradaṃ(m),**
**vittapradaṃ(n) nityamimaṃ(m) vihāya .**
**akāmadaṃ(n) duḥkhabhayādhiśoka-**
**mohapradaṃ(n) tucchamahaṃ(m) bhaje'jñā .. 31..**

duḥkha+ bhayā+ dhiśoka

**अहो मयाऽऽत्मा परितापितो वृथा,**
**सां(ङ्)केत्यवृत्त्यातिविगर्ह्यवार्तया ।**
**स्त्रैणान्नराद् यार्थतृषोऽनुशोच्यात्,**
**क्रीतेन वित्तं(म्) रतिमात्मनेच्छती ॥ 32 ॥**

**aho mayā''tmā paritāpito vṛthā,**
**sāṃ(ṅ)ketyavṛttyātivigarhyavārtayā .**
**straiṇānnarād yārthatṛṣo'nuśocyāt,**
**krītena vittaṃ(m) ratimātmanecchatī .. 32..**

sāṃ(ṅ)ketya +vṛttyā+ tivigar+ hyavārtayā,
straiṇān+ narād,
yārtha+ tṛṣo'+ nuśocyāt,
rati+ mātma+ necchatī

यदस्थिभिर्निर्मितवं(व्)शवं(व्)श्य-
स्थूणं(न्) त्वचा रोमनखैः(फ्) पिनद्धम् ।
क्षरन्नवद्वारमगारमेतद्,
विण्मूत्रपूर्णं(म्) मदुपैति कान्या ॥ 33॥

yadasthibhirnirmitavaṃ(v)śavaṃ(v)śya-
sthūṇaṃ(m) tvacā romanakhaiḥ(ph) pinaddham .
kṣarannavadvāramagārametad-
viṇmūtrapūrṇaṃ(m) madupaiti kanyā .. 33..

yadasthibhir+ nirmita+ vaṃ(v)śa+ vaṃ(v)śya, pinad+ dham
kṣaran+ navadvā+ ramagā+ rametad, viṇ+ mūtra+ pūrṇaṃ(m)

विदेहानां(म्) पुरे ह्यस्मिन्- नहमेकैव मूढधीः ।
यान्यमिच्छन्त्यसत्यस्मा- दात्मदात् काममच्युतात् ॥ 34 ॥

videhānāṃ(m) pure hyasmin- nahamekaiva mūḍhadhīḥ .
yānyamicchantyasatyasmā- dātmadāt kāmamacyutāt .. 34..

yānya+ micchantya+ satyasmā,
kā+ mamac+ yutāt

सुहृत् प्रेष्ठतमो नाथ , आत्मा चायं(म्) शरीरिणाम् ।
तं(म्) विक्रीयात्मनैवाहं(म्), रमेऽनेन यथा रमा ॥ 35॥

suhṛt preṣṭhatamo nātha, ātmā cāyaṃ(m) śarīriṇām .
taṃ(m) vikrīyātmanaivāhaṃ(m), rame'nena yathā ramā .. 35..

vikrī+ yātma+ naivāhaṃ(m)

कियत् प्रियं(न्) ते व्यभजन्, कामा ये कामदा नराः ।
आद्यन्तवन्तो भार्याया, देवा वा कालविद्रुताः ॥ 36 ॥

Kiyat priyaṃ(n) te vyabhajan, kāmā ye kāmadā narāḥ .
ādyantavanto bhāryāyā, devā vā kālavidrutāḥ .. 36..

ādyan+ tavanto

नूनं(म्) मे भगवान् प्रीतो, विष्णुः(ख्) केनापि कर्मणा ।
निर्वेदोऽयं(न्) दुराशाया , यन्मे जातः(स्) सुखावहः ॥37 ॥

nūnaṃ(m) me bhagavān prīto, viṣṇuḥ(kh) kenāpi karmaṇā .
nirvedo'yaṃ(n) durāśāyā, yanme jātaḥ(s) sukhāvahaḥ .. 37..

मैवं(म्) स्युर्मन्दभाग्यायाः(ख्), क्लेशा निर्वेदहेतवः ।
येनानुबन्धं(न्) निर्हृत्य , पुरुषः(श्) शममृच्छति ॥ 38॥

maivaṃ(m) syurmandabhāgyāyāḥ(kh), kleśā nirvedahetavaḥ .
yenānubandhaṃ(n) nirhṛtya, puruṣaḥ(ś) śamamṛcchati .. 38..

syur+ manda+ bhāgyāyāḥ(kh), nirveda+ hetavaḥ, yenā+ nubandhaṃ(n)

तेनोपकृतमादाय , शिरसा ग्राम्यसं(ङ्)गताः ।
त्यक्त्वा दुराशाः(श्) शरणं(म्), व्रजामि तमधीश्वरम् ॥ 39॥

tenopakṛtamādāya, śirasā grāmyasaṃ(ṅ)gatāḥ .
tyaktvā durāśāḥ(ś) śaraṇaṃ(m), vrajāmi tamadhīśvaram .. 39..

teno+ pakṛta+ mādāya

सन्तुष्टा श्रद्दधत्येत- द्यथालाभेन जीवती ।
विहराम्यमुनैवाह-मात्मना रमणेन वै ॥40 ॥

santuṣṭā śraddadhatyeta- dyathālābhena jīvatī .
viharāmyamunaivāha- mātmanā ramaṇena vai .. 40..

śrad+ dadhatyeta- dyathālā + bhena, viharāmya+ munai+ vāha

सं(व्)सारकूपे पतितं(म्), विषयैर्मुषितेक्षणम् ।
ग्रस्तं(ङ्) कालाहिनाऽऽत्मानं(ङ्), कोऽन्यस्त्रातुमधीश्वरः ॥ 41 ॥

saṃ(v)sārakūpe patitaṃ(m), viṣayairmuṣitekṣaṇam .
grastaṃ(ṅ) kālāhinā''tmānaṃ(ṅ), ko'nyastrātumadhīśvaraḥ .. 41..

viṣayair+ muṣi+ tekṣaṇam, kālā+ hinā''t+ mānaṃ(ṅ), ko'nyas+ trātuma+ dhīśvaraḥ

आत्मैव ह्यात्मनो गोप्ता, निर्विद्येत यदाखिलात् ।
अप्रमत्त इदं(म्) पश्येद्, ग्रस्तं(ङ्) कालाहिना जगत् ॥ 42 ॥

ātmaiva hyātmano goptā, nirvidyeta yadākhilāt .
āpramatta idaṃ(m) paśyed, grastaṃ(ṅ) kālāhinā jagat .. 42..

nir+ vidyeta

ब्राह्मण उवाच
एवं(म्) व्यवसितमतिर्- दुराशां(ङ्) कान्ततर्षजाम् ।
छित्त्वोपशममास्थाय, शय्यामुपविवेश सा ॥ 43 ॥

brāhmaṇa uvāca
evaṃ(m) vyavasitamatir- durāśāṃ(ṅ) kāntatarṣajām .
chittvopaśamamāsthāya, śayyāmupaviveśa sā .. 43..

vyavasi+ tamatir, kān+ tatar+ ṣajām,

chittvo+ paśa+ mamāsthāya, śayyā+ mupa+ viveśa

आशा हि परमं(न्) दुःखं(न्), नैराश्यं(म्) परमं(म्) सुखम् ।
यथा सञ्छिद्य कान्ताशां(म्), सुखं(म्) सुष्वाप पिं(ङ्)गला ॥ 44 ॥
āśā hi paramaṃ(n) duḥkhaṃ(n), nairāśyaṃ(m) paramaṃ(m) sukham .
yathā sañchidya kāntāśāṃ(m), sukhaṃ(m) suṣvāpa piṃ(ṅ)galā .. 44..

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायामेकादशस्कन्धेऽष्टमोऽध्यायः।।

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃsyāṃ
saṃhitāyāṃekādaśaskandheaṣṭamo'dhyāyaḥ .. 8..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇatPūrṇamudacyate|
Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||
Om Shantih(ś) Shantih(ś) Shantih ||